## हताश-प्रणयी ।

('*Come away, come away, death &c.*'—TWELFTH NIGHT.)

( वियोगिनीच्छन्दः । )

शमन त्वमुपेत्युपेहि मां
घननीलो निलयस्तथास्तु मे ।
द्रुतमुच्छ्वसितञ्च गच्छतु
मधुरस्त्रीरदया निहन्ति माम् ॥१

सगभीरशुचाभिसूचनं
मम शुक्लावरणं विरच्यताम् ।
निरतः प्रणयी न कोऽपि हा
दुरदृष्टं भजति हि मादृशम् ॥२

कुसुमं न सुगन्धि किञ्चन
मम कृष्णे शयने विकीर्य्यताम् ।
न सखाऽटतु तत्र कोऽपि वा
हतदेहं स्थितमस्थि यत्र मे ॥३

ननु तत्र निधेहि मां पुनः
शतधुच्छ्वसितानि वाधितुम् ।
शयनं खलु यत्र रोदितुं
सविषादः प्रणयी न वेद मे ॥४

HEM CHANDRA ROY
*Third year class.*